पुष्पी ७ माधवी ८ कारवी ९ शिफा १०
संघातपत्रिका ११ छत्रा १२ वज्रपुष्पा १३
सुपुष्पिका १४ शतप्रसूना १५ बहला १६
पुष्पाह्वा १७ शतपत्रिका १८ वनपुष्पा १९
भूरिपुष्पा २० सुगन्धा २१ सूक्ष्मपत्रिका २२
मधुरिका २३ अतिच्छत्रा २४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। स्निग्धत्वम्। श्लेष्मातिसारज्वरनेत्रव्रणनाशित्वम्। वस्तिकर्म्मणि प्रशस्तत्वञ्च ॥ * ॥ तद्बीजगुणाः। उष्णत्वम्। मधुरत्वम्। गुल्मशूलवातनाशित्वम्। दीपनत्वम्। पथ्यत्वम्। पित्तहारित्वम्। रुचिदायकत्वञ्च। इति राजनिर्घण्टः ॥ * ॥ अपि च।

"शताह्वानिलशाहामशूलछर्द्दिनाशिनी।"

इति द्रव्यगुणः ॥

अन्यच्च।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित्।
रुच्या वस्तिहिता नेत्र्या वह्निविट्शमिशुक्रकृत्।
संग्राही शीतला तिक्ता दाहजित् वातला
लघुः ॥"

इति भावप्रकाशः।

अन्यन्मधुरिकाशब्दे द्रष्टव्यम् ॥

शतपुष्पिका, स्त्री, ( शतपुष्पा + स्वार्थे कन्। टापि अत इत्वम्। ) शतपुष्पा। इति शब्दरत्नावली ॥

शतप्रसूना, स्त्री, (शतं प्रसूनानि पुष्पाणि यस्याः।) शतपुष्पा। इति राजनिर्घण्टः ॥

शतप्रासः, पुं, ( शतं प्रासा इव फलानि यस्य। ) करवीरवृक्षः। इत्यमरः ॥

शतभिषक्, [ ज् ] स्त्री, ( शतं भिषज इव तारा यत्र। ) शतभिषानक्षत्रम्। इति शब्दरत्नावली ॥ ( यथा, बृहत्संहितायाम्। ९। ३४।

"शतभिषजि शौण्डिकाना-
मजैकपे द्यूतजीविनां पीड़ा ॥"

शतभिषजि जाते, त्रि। अत्र "वत्सशालाभिजिदश्वयुक्छतभिषजो वा।" ४। ३। ३६। इति जातार्थप्रत्ययस्य लुक् ॥ )

शतभिषा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्विंशनक्षत्रम्। तत्पर्य्यायः। शतभिषक् २। इति शब्दरत्नावली ॥ अस्या आकृतिर्म्मण्डलाकारशततारामयी। यथा,—

"मण्डलाभशततारकाकुले-
ऽध्यभाजि नभसः प्रचेतसि।
वाजशैलधरणीमिताः कला:
शारदेन्दुसुखि तावुरेयुः ॥" दं २। पं ५५।

इति कालिदासकृतराशिलग्नमाननिरूपणम् ॥ अस्या अधिष्ठातृदेवता वरुणः। यथा,—

"अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः।
योन्यर्य्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः।
शक्रो निरृतिस्तोयं विश्वविरिञ्चौ हरिर्व्वसुवरुणः।
अजपादोऽहिर्ब्बुध्न्यः पूषा चेतीश्वरा भानाम् ॥"

सा तु अधोमुखी। यथा,—

"अश्लेषवह्नियमपित्र्यविशाखयुक्तं
पूर्व्वात्रयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्थभूमिखननेषु च तूषितानि ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

तत्र जातफलम्।

"शीतभीतिरतिसाहसी सदा
निष्ठुरो हि चतुरो नरो भवेत्।
वैरिणामतिशयेन दारुणो
वारुणोडु यदि यस्य सम्भवे ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

तत्र जातस्य मिश्रगुणाः। यथा।

"शतानलादित्यविशाखमैत्र-
शक्रोद्भवा मिश्रगुणाः प्रदिष्टाः।
शिवाजहस्ताहिभवा जघन्याः
शेषोद्भवाः सत्पुरुषा भवन्ति ॥" * ॥

रविवारादौ शतभिषादियोगे ज्वरोत्पत्तिफलं यथा,—

"शिवशतभिषावातौ याम्यसर्पक्षिपूर्व्वाः
शनिरविकुजवारे भूतगोष्ठीनवम्याम्।
इह हि मरणयोगे यो हि रोगोपयुक्तः
पशुपतिसमदेहः सोऽपि मृत्युं प्रयाति ॥
उत्तरे विंशतिर्ज्ञेया द्वौ मासौ श्रवणे तथा।
धनिष्ठायामर्द्धमासं वारुणेन दशाहकम् ॥"

इति ज्योतिःसारसङ्कलितकौशिकवचनम् ॥

शतभीरुः, स्त्री, मल्लिका। इत्यमरः ॥ शतं बहवो वियोगिनो भीरवोऽस्या इति शतभीरुः। शीतभीरुरिति च पाठः। तदा ग्रैष्मिकत्वेन शीताद्बिभेतीति शीतभीरुः। इति भरतः ॥

शतमखः, पुं, ( शतं मखा यज्ञा यस्य। ) इन्द्रः। इति हलायुधः ॥ ( यथा, कुमारे। २। ६४।

"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥" )

शतमन्युः, पुं, ( शतं मन्यवः क्रतवो यस्य। ) इन्द्रः। इत्यमरः ॥ ( यथा, भागवते। १। ८। ६।

"याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः।
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥"

शतयज्ञकारिणि, त्रि। यथा, बृहत्संहितायाम्। ४३। ५४।

"त्वमनन्तकः सर्व्वहरः कृशानुः
सहस्रशीर्षा शतमन्युरीड्यः ॥"

बहुक्रोधे च त्रि। यथा, ऋग्वेदे। १०।१०३।७।

"वीरः शतमन्युरिन्द्रः।"

"शतमन्युः बहुयज्ञः बहुक्रोधो वा।" इति तद्भाष्ये सायणः। )

शतमानः, पुं, क्ली, रूप्यपलम्। आढ़कः। इत्यमरभरतौ ॥ ( यथा, मनुः। ८। १३७।

"धरणानि दश ज्ञेयाः शतमानस्तु राजतः।
चतुः सौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"

शतलोकपूज्ये, त्रि। यथा, वाजसनेयसंहितायाम्। १९। ९३।

"इन्द्रस्य रूपं शतमानमायु-
श्चन्द्रेण ज्योतिरमृतं दधानः ॥"

"शतानामनेकेषां प्राणिनां मानं पूजा यस्मिन् तत् जगत्पूज्यमित्यर्थः।" इति तद्भाष्ये महीधरः ॥ )

शतमार्जः, पुं, ( शतं शतवारं मार्जयति शस्त्राणीति। मृज शुद्धौ + णिच् + अच्। ) अस्त्रकारकः। इति केचित् ॥ ( क्वचित् शस्त्रमार्ज इति पाठः ॥ )

शतमूला, स्त्री, ( शतं मूलानि यस्याः। ) दूर्व्वा। वचा। इति राजनिर्घण्टः ॥

शतमूलिका, स्त्री, ( शतं मूलानि यस्याः। ततः स्वार्थे कन्। ) द्रवन्ती। इ॰ राजनिर्घण्टः ॥

शतमूली, स्त्री, (शतं मूलानि यस्याः। "पाककर्णेति।" ४।१।६४। ङीष्। ) स्वनामख्यातौषधविशेषः। तत्पर्य्यायः। बहुसुता २ अभीरुः ३ इन्दीवरी ४ वरी ५ ऋष्यप्रोक्ता ६ भीरुपत्री ७ नारायणी ८ शतावरी ९ अहेरुः १०। इत्यमरः ॥ रङ्गिणी ११ शटी १२ द्वीपिशत्रुः १३। इति जटाधरः ॥ ऋष्यगता १४। इति शब्दरत्नावली ॥ शतपदी १५ पीवरी १६ धीवरी १७ वृष्या १८ दिव्या १९ दीपिका २० दरकण्टिका २१ सूक्ष्मपत्रा २२ सुपत्रा २३ बहुमूला २४ शताह्वया २५ स्वादुरसा २६ शताह्वा २७ लघुपर्णिका २८ आत्मगुप्ता २९ जटा ३० मूला ३१ शतवीर्य्या ३२ महौषधी ३३ मधुरा ३४ शतमूला ३५ केशिका ३६ शतपत्रिका ३७ विश्वस्या ३८ वैष्णवी ३९ पार्व्वती ४० वासुदेवप्रियङ्करी ४१ दुर्मना ४२ तैलवल्ली ४३। अस्या गुणाः। वृष्यत्वम्। मधुरत्वम्। हिमत्वम्। मेहकफवातपित्तनाशित्वम्। तिक्तत्वम्। श्रेष्ठत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शतावरी बहुसुता भीरुरिन्दीवरी वरी।
नारायणी शतपदी शतवीर्य्या च पीवरी ॥
महाशतावरी त्वन्या शतमूल्यूर्द्ध्वकण्टिका।
सहस्रवीर्य्या हेतुश्च ऋष्यप्रोक्ता महोदरी ॥
शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसार-
जित्।
शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित् ॥"

इति भावप्रकाशः ॥ * ॥

अन्यच्च।

"शतावरी वातपित्तमेहकृच्छ्रहरा सरा।"

इति राजवल्लभः ॥

शतयष्टिकः, पुं, ( शतं यष्टयो गुच्छा यस्य। ) शतलतिकहारः। तत्पर्य्यायः। देवच्छन्दः २। इत्यमरः ॥

शतरु(द्रि)द्रीयं, त्रि, ( शतं रुद्रा देवता अस्य। शतरुद्र + "शतरुद्राद्घश्च घश्च।" ४।२।२८। इत्यस्य वार्त्तिकोक्त्या घः पक्षे छश्च। ) हविरादिकम्। इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते। ७। ७९। १३।